श्रीगन्धर्वराजविरचितः रागरत्नाकरः

सम्पादकः— राधावल्लभः त्रिपाठी

Preface To Rāgaratnākara

We are happy to present the text of Rāgaratnākara before the lovers of Sanskrit and researchers interested in Sanskrit sources of Musicology. The text Is edited from the single ms. obtained from undated Bhandarkar Oriental Research Institute (Mss no. 10811, B-6642). Copy of this ms scribed in fairly legible Devanāgarī, was presented to BORI by Chadra Bhānjī Bhonsale, as per note on the first page of the ms. The ms. comprises 19 folios. The work is ascribed to one Gandharvarāja in the colophon. The use of coloquial terms from vernaculars indicates that the work might have been composed after 17th century A.D.

Rāgaratnākara is a compilation of verses from various sources. The very first benedictory stanza belongs to the Mālatīmādhava of Bhavabhūti. The author of Rāgaratnākara himself acknowledges his debt to great authors like Kāśyapa, Kohala, Mataṅga, Dattila, Gaṇeśa, Nārada, Tuṁburu, Arjuna, Rāvaṇa and works like Na-yārṇava, Nā-yālocana Bhāratodaya, Śrī Rāgasāgara etc.

Rāgaratnākara covers a vast range of topics related to Music and Musicology. The very philosophy of *Nādabrahman* has been beautifully expounded in the beginning. Then the autor goes to explain the concepts of seven notes (*saptasvaras*), their origin and their relation to phonetic organs of human body. The major part of the work comprises details of six rāgas as per Rāgamālikā. The origin of these Rāgas, along with enumeration of their Rāgiṇīs, the method of dhyāna for different Rāgas and Ragiṇīs are also expalined. The uniqueness of this work lies in preserving the tradition of the family of Rāgas, their wives, sons and daughters as well as their varṇas (castes).

Besides the blemishes of singing, the work notes some Āyurvedic prescriptions for improving the voice of a singer.

I have tried to present a flawless readable copy of the text. However, there are a no. of corrupt passages and readings that require further correction.

It is hoped that a critical edition of this work can be prepared after the acquisition of other mss.

— Radhavallabh Tripathi

।। रागरत्नाकरग्रन्थः ।।

श्रीगणेशाय नमः।।
अथरागरत्नाकरो लिख्यते ।।
तत्रादौ मङ्गलाचरणम्

सानन्दं नन्दिहस्ताहतमुरजरवाहूतकौमारबर्हि-
त्रासान्नासाग्ररन्ध्रं विशति फणिपतौ भोगसङ्कोचभाजि।
गण्डोड्डीनालिमालामुखरितककुभास्ताण्डवे शूलपाणे-
र्वैनायक्यश्चिरं वो वदनविधुतयो पान्तु फूत्कारवत्यः[१]।।१।।

शिवपुत्रं बुद्धीशं वन्दे गणपतिं सिद्धीशम्।
इभवरवक्त्रं सुपवित्रङ्कलये मूषकवरपत्रम्।।२।।

जडमतिहन्त्रीं जनधात्रीं वन्दे पङ्कजभवपुत्रीम्।
वाचोदारां करवीरां कलये तारामणिहाराम्।।३।।

विहगपुङ्गवपुङ्गववाहनं
मकरकुण्डलकुण्डलिकुण्डली।
वपुरुमाधवमाधवयोः श्रियं
दिशतु चन्द्रिकचन्द्रिकचन्द्रिका।।४।।

चैतन्यं सर्वभूतानां निवृत्तं जगदात्मनि।
नादब्रह्मामृतानन्दमद्वितीयमुपास्महे।।५।।

ब्रह्मणोस्य परोविष्णुः विष्णोः परतरःशिवः
शिवात्परतरो नादो नादात्परतरं नहि।।६।।

नादरूपी भवेद्ब्रह्मा नादरूपो जनार्दनः।
नादरूपपरः शम्भुस्तस्मान्नादात्मकं जगत्।।७।।

आहतोऽनाहतश्चैव द्विधा नादो निगद्यते।
स्वयंप्रकाशने पिण्डः श्रुतिकण्ठव्यवस्थितः।।८।।

---

१. मालतीमाधवप्रकरणस्य नान्दीयम्। 'चीत्कारवत्य'इति पाठः प्रायः मालतीमाधवपुस्तकेषु दृश्यते।

काश्यपङ्कोहलं चैव मातङ्गं दत्तिलं तथा।
वैशाखिनं च माघेशं नाट्यं गिरिसुतामतम्॥९॥

नारदं तुम्बरुञ्चैव अर्जुनं रावणादिकम्।
पूर्वाचार्यैर्विरचितं नाट्यार्णवमथापि वा॥१०॥

नाट्यं लोचनमानन्दवर्धनं भरतोदयम्।
भवप्रकाशितं चैव तथा श्रीरागसागरम्॥११॥

आत्मा विवक्षमाणोऽयं मनः प्रेरयते पुनः।
देहस्थं वह्निमाश्रित्य स प्रेरयति मारुतम्॥१२॥

ब्रह्मग्रन्थिस्थितं चाथ क्रमादूर्ध्वमथाचरन्।
नादः सूक्ष्मोतिसूक्ष्मश्च पुष्टोपुष्टश्च कृत्रिमः॥१३॥

कण्ठमध्ये हृदोमध्ये मध्यमज्ञैः प्रकीर्त्तितौ।
तारस्कमूर्ध्नि विज्ञेयो इत्युक्तं पूर्वसूरिभिः॥१४॥

तस्य द्वाविंशतिर्भेदाः श्रवणाच्छ्रुतयोमताः।
श्रुतिव्यक्तस्वराः षड्जर्षभगान्धारमध्यमाः॥१५॥

पञ्चमो धैवतश्चास्य निषाद इति सप्तमः।
एते सप्तस्वरा ज्ञेया तन्त्रीकण्ठोत्थितास्सदा॥१६॥

षड्जः। ऋषभागान्धारौ। मध्यमः। पञ्चमः। धैवतः। निषादः। एते सप्तस्वराः गुरुमुखेन ज्ञेयाः चतुःश्रुतिस्त्रिश्रुतिश्च द्विश्रुतिश्च चतुःश्रुतिः एकश्रुतिर्द्विश्रुतिश्च त्रिःश्रुतिश्चेत्यनुक्रमात्।

षड्जः ग्रामः पञ्चमश्च चतुर्थः श्रुतिसंज्ञितः।
सोऽश्वोथात्यश्रुसंस्थोपि(?) मध्यग्रामश्च इष्यते॥

क्रमात्स्वराणां सप्तानां आरोहश्चावरोहणं मूर्छनेत्युच्यते। ग्रामद्वयं तास्सप्त सप्त च षड्ज उत्तरमंद्रादौ, रजनीचोत्तरायता, शुद्धषड्जा, मात्सरिता, अश्वक्रान्ताभिरुद्रता॥

मध्यमैः स्यात्तु सौवेरीहरिणाश्वा ततः परौ।
स्यात्कालायतना शुद्धा मध्यमार्गी च पौरवी॥१॥

हृष्यतेत्यथ सप्ता च लक्षणं प्रतिपाद्यते।
चतुर्धा ताः पृथक्सिद्धाः काकली कलितास्तथा॥२॥

शान्तरावद्वयोपेता षट्पञ्चाशत्प्रकीर्त्तिताः।
नाना स्युर्मूर्छना शुद्धाः षाडवो ओडवस्तथा॥३॥

षड्जासप्तहीनाश्च क्रमात्स्वराजसप्तयः।
तदाद्वाविंशतिस्थानमध्यमे सति गर्जिता॥४॥

सप्तक्रमाद्यथा न स्युस्तदा ता एकविंशतिः।
मूर्छना लक्षणानि स्युः ज्ञातव्याश्चप्रयत्नतः॥५॥

इति मूर्छनाग्रामसवनाताल लक्षणानि॥

अथ सप्तस्वरलक्षणम्॥

निषादर्षभगान्धारषड्जमध्यमधैवताः।
पञ्चमश्चेत्यमी सप्ततन्त्रीकण्ठोत्थिताः स्वराः॥१॥

शिखि चातोद्यजः क्रौञ्चपिकदर्दुरकुञ्जराः।
सप्तस्वरसमालापा इति रागविदो विदुः॥२॥

षड्जं मयूरो वदति ऋषभश्चातकोऽवदत्।
अजो वदति गान्धारं क्रौञ्चो वदति मध्यमम्॥३॥

धैवतं वदति नागो निषादं दर्दुरो वदेत् ।
ऋतौ वसन्तसमये पिको वदति पञ्चमम्॥४॥

॥ इति सप्तस्वरज्ञानम् ॥

सप्तस्वरनामाक्षरोच्चारणेन स्वरमण्डलं तेन ज्ञानं स-रि-ग-म-प-ध-नि॥ नैपत्यं नि-ध-प-म-ग-रि-स॥ अनुलोमविलोमपठनेन स्वरमण्डलबन्धनम्॥

अथ मुखोच्चारणेन ततः स्वरज्ञानं श्लोकः॥

नासाकण्ठोरस्तालुजिह्वादन्ताः परिस्फुटम्।
षड्भिः संज्ञायते यस्मात्षड्ज इत्यभिधीयते॥१॥

वायुस्समुत्थितो नाभेः कण्ठतालुसमाश्रितैः।
जायते ऋषभश्चैव ऋषभोऽयमतन्द्रितः॥२॥

इति ऋषभस्वरलक्षणम्॥

नाभेः समुत्थितो वायुः कण्ठे तालुसमाश्रितः।
गान्धारस्यापि हेतुत्वात्स्वयं गान्धार उच्यते ॥

इति गान्धारलक्षणम्॥

नाभिहृत्कण्ठदेशे तु तस्मान्मध्यम उच्यते॥

इतिमध्यमः॥

नाभिहृत्कण्ठताल्वोष्ठपञ्चकात्पञ्चमो भवेत्॥

इति पञ्चमस्वरलक्षणम्॥

नाभेर्हृदयसम्भूतो धैवतः परिकीर्त्तितः॥

इति धैवत स्वरलक्षणम्॥

नाभिहृत्कण्ठताल्वोष्ठजिह्वादन्ता निषादभित्॥

इति निषादस्वरलक्षणम्।।

॥ इति रागरत्नाकरेगन्धर्वराजविरचिते सप्तस्वरलक्षणम्॥

अथ स्थानानि रागमालिकामध्ये-

श्रीरागश्च वसन्तश्च मध्यमो भैरवस्तथा।
मेघरागोऽथ विज्ञेयो षष्ठो नटनारायणः॥

श्रीरागः। वसन्तः। पञ्चमः। भैरवः। नटनारायणः। एते षड्रागा मुख्याः ॥

अथ श्रीरागध्यानम्॥

दिव्यवपुश्चन्द्रनिभं सुगौरं,
कर्णेदधानं शरदम्बुजानि।
इक्षुं वहन्तं निजपाणिपद्मे,
श्रीरागराजं मुनयो वदन्ति॥१॥

गौडीकोलाहलान्ध्रालीद्रविडीमालिकौषिका।
षष्ठी च देवगान्धारी श्रीरागस्यवराङ्गनाः॥२॥

स्तनभरनमिताङ्गी कर्णताटङ्कलम्बी।
मणिनिभदशमाली मस्तके मुक्तमाली॥३॥

करतलधृतगुञ्जा लीलया स्मेरवक्त्रा।
मृदुसितशुभवस्त्रा गौडिका रागिणी सा॥४॥

इति गौडी ध्यानम्॥

सुचञ्चला चञ्चलनेत्रवक्त्रा
गौरस्तनी पीनशरीरकान्तिः।
ताम्बूलवीटीं दधन्ती कराब्जे
कोह्लालिनी नीलदुकूलराजिता॥

इति कोह्लालिका॥

अन्ध्रालिका प्रौढवपुः सुनेत्रा
पीयूषपात्रा कमनीयरूपा
दीर्घस्तनीकुङ्कुमरागशोणा
वासन्तिका पुष्पकरा शुभाङ्गी॥१॥

आधाल्लिकर्णं भूषयन्ती संलम्बिनी कोमला।
मधुरसुन्दरभाषिणी द्राविडी कनककान्तघनस्तनी॥२॥

कञ्चुकीरहितपीननितम्बिनी द्राविडी स्मेराननना।
पीतवर्णा दृढपीनघनस्तनी पुण्डरीकहस्ता विमला॥३॥

राजते मालिकौशिका॥४॥

इति मालिकौशिका

गम्भीरनाभिस्त्रिवली[तरङ्गिता] पद्मालया पद्मकरा मनोहरा।
श्यामा सुवेषा पृथुवर्त्तुलस्तनी दसाव(?)गान्धारिवधूर्विराजते॥

एवं श्रीरागस्य सपत्नीकस्य रूपविवेकः॥

अथ वसन्तस्य सपत्नीकस्य रूपविवेकः॥

श्यामः सुवेषः सुकुसुम्भवासाः पलाशपुष्पाभरणानि यस्य।
सानन्दवक्त्रोद्धृतचापबाणो गजाधिवाहः कथितोवसन्तः॥

तस्याङ्गनाः॥

धानाश्री च वराटी च रामक्री पटमञ्जरी
गोण्डाग्री चैव देशाङ्का वसन्तस्य वराङ्गनाः॥१॥

हारिद्रोद्वर्त्तनाङ्गी सुचपलनयना पीतवस्त्रा सुवक्त्रा
पीनोरस्का सुबाहुः कमलकरयुगा मालती पुष्पकेशा॥२॥

स्वर्णालङ्कारभूषा मणिमयरसना नूपुरांघ्रिस्समान्द्या।
धानाश्री ध्यानगम्या बहुलसुखकरी[1] गायकानां प्रसन्ना॥३॥

इति धानाश्रीः॥

वराटिका कोकिलकण्ठनादा कन्दप्रभूषातिलघुः शुभाङ्गी
लघुस्तनी वर्त्तुलवक्त्रपद्मा जम्बूफलं पाणितले दधाना॥

वराटीध्यानम्॥

वनघनतरुमूले तिष्ठती बाणहस्ता
अलघुतनुशरीरा रामनाथा कृता सा
वनकुसुमसुमाला केतकीपत्रकान्तिः
अमृतकलशहस्ता रागिणी पातु यूयम्॥१॥

रामक्री शुभाङ्गा शुभवर्णा च शुभ्रपुष्पावतंसिनी।
दध्योदनकरा शान्ता पातु वः पटमञ्जरी॥२॥

मञ्जरीध्यानम्॥

गुञ्जाहारां प्रदृढदशनां चञ्चलां बाणहस्ताम्।
हंसारूढां प्रकटितकुचां पर्णताटङ्कशोभाम्॥१॥

---

१. बहुतसुखारीति मातृकायां पाठः।

केकानादां वनफलरतां कम्बुकण्ठीनवाङ्गीं
गौडाग्रीं यां मधुपतिरतां रागिणीं तां नमामि॥२॥

गौडी देशाङ्गामरुणीं श्यामां मालतीकुसुमप्रियाम्।
सुस्तनीं वेदिमध्याङ्गीं स्मरामो कुंकुमाङ्किताम्॥३॥

इति सपत्नीकवसन्तध्यानम्॥

गौरस्सुनेत्रोधृतचापयष्टिः तुरङ्गवाहस्सुचरित्रलीलः।
आरक्तवर्ण खलुसंस्थितोऽपि[१] स पञ्चमो यः शुभदृश्यलीलः॥

तस्यान्धवराङ्गनाः॥

खम्बावती त्रिवली च अहिरी ककुभातथा।
वल्लकी चैव साबेरी षडेताः पञ्चमाङ्गनाः॥१॥

राजस्त्रीवच्छुभाङ्गी स्याद्विचित्राम्बरभूषणा।
खम्बावती फणिकरा राजते पञ्चमप्रिया॥२॥

खम्बावती ध्यानम्॥

त्रिवल्ली ललिताश्यामा निम्ननाभिस्तनूदरी।
त्रिभङ्गी भावगम्भीरा शुकहस्ता पृथुस्तनी॥१॥

त्रिवल्ली नागकन्यातितन्वङ्गी दुग्धपानमहोत्कटा।
सुकुण्डला नागहारा अहिरी कठिनस्तनी॥२॥

आताम्रनयना गौरा पृथुलस्तनमण्डला।
ताम्बूलकरपद्मास्यात्ककुभा रक्तदन्तिका॥३॥

इतिककुभाध्यानम्॥

मयूरवाहना नीला नीलोत्पलकराम्बुजा।
चतुर्भुजा त्रिनयना वल्लकी स्तनपीवरा॥१॥

सावेरि केशिनी मुग्धा दर्पणाननपश्यति।
पयोधरभराक्रान्ता लीला मानसमोहना॥२॥

इति पञ्चसपत्नीकः॥

---

१. आरक्तवनसंस्थितोऽपीति मातृकायां पाठः।

भस्माङ्गलिप्तावयवःसुगात्रो
भालस्थले शोभितचन्द्ररश्मि
त्रिशूलहस्तो वृषभाधिरूढो
स भैरवो यः कथितो मुनीन्द्रैः॥१॥

भैरवी गुर्जरी चैव ललिता वेलाबुली तथा।
कर्णाटी रक्तहंसा च षडैता भैरवप्रियाः॥२॥

घण्टां वामे दधानां त्रिशिखरवहतिं सर्वभूषां त्रिनेत्रां,
चन्द्रास्यां चन्द्रभालां वृषपतिवहतिं सुस्वरां सामगानाम्॥
देवीं दिव्याम्बराढ्यां वररुचिरतनुं भस्मना चर्चिताङ्गीं
उत्तुङ्गस्तब्धपीनस्तनभरनमितां भैरवीं तां नमामि॥३॥

रक्ताम्बरी गुर्जरिका स्मरार्त्ता
रक्तारविंदं सुकरे दधाना
रक्तद्विजारक्तनखाष्टपादा
श्रीभैरवस्त्री द्विभुजा शुभास्यात्॥४॥

चामीकराभा ललिता सुमुग्धा
वीणाधरा कोकिलपाणिपद्मा
कल्पद्रुमाधःस्थलसंस्थिताऽपि
पयोधरा नन्दितकोटिकामा॥५॥

चेलावुली रक्तनिभा सुमध्या
रक्ताम्बरा रक्तविभूषणाढ्या
द्वाभ्याङ्कराभ्यान्धृतरक्तपद्मा
कुचोन्नता भैरवनाथकान्ता॥६॥

कर्णाटिका भोगविलासलालसा
दुकूलवासा सुदती सुनाभिः
वृत्तस्तनी मुग्धविभूषिताङ्गी
पुन्नागपुष्पाभरणावतंसिनी॥७॥

रक्तहस्ता रक्तपादा रक्तपुष्पावतंसिनी
रक्तदण्डधरा रक्ता तप्तकाञ्चनभूषणा॥८॥

इति भैरवस्य सपत्नीकं ध्यानम्॥

अथ मेघरागः॥

कदम्बवृक्षस्थितदिव्यमूर्त्तिर्मयूरवाहः करवीरपत्रः।
हरीतवस्त्रो बहुनीलवर्णः समेघरागः कथितो मुनीन्द्रैः॥१॥

त्रोटकी मोटकी चैव अहन्नटा अपरा तथा।
बृहन्नटा मरीचमेघरागवराङ्गनाः॥२॥

विचित्रवस्त्रा वरकञ्चुकाद्या।
सुकङ्कणा काञ्चिनितम्बिनी च॥
उरोजवृत्ता धृतपाणिवीणा।
सङ्गीतलुब्धा प्रथमा वधूः सा॥३॥

॥ इति त्रोटकी ॥

त्रोटकी जलकुम्भाढ्या चन्द्रमण्डलसन्निभा।
शान्ता दिव्याम्बरधरा द्विभुजा स्तनमण्डिता॥१॥

अहन्नटा नटरूपा कञ्चुकाच्छातिदतस्तनी।
नृत्यसङ्गीतकुशला कोकिलारवगायिनी॥२॥

अपरा वनिता गौरी गान्धर्वगीतकोविदा
चतुर्भुजा कोमलाङ्गी दिव्यवस्त्रावृतस्तनी॥३॥

बृहन्नटा नाटकयुक्तिसारा
हंसासना पुस्तकधारिणी सा।
घनस्तनी श्वेतसुपुष्पयुक्ता
पयोन्धसा भुक्तवती सुमध्या॥४॥

मल्लरी किन्नरीहस्ता कीरसारससंयुता।
सर्वावयवसंयुक्ता मेघरागवराङ्गना॥५॥

॥ इति सपत्नीकमेघरागध्यानम् ॥

॥ अथ नटनारायणः ॥

चतुर्भुजः प्रावृतपीतवस्त्रः
कण्ठे तु दीर्घः शुभवस्त्रनालः।

श्यामं वपुः सुन्दरताक्ष्यवाहः
सनन्दनारायणदिव्यरूपः॥१॥

बङ्गाली शुद्धसालाङ्का काम्बोजा मधुमाधवी।
देवग्री देहली चैव नटनारायणप्रियाः॥२॥

कृष्णा कृष्णाम्बरा धीरा प्रगल्भा रतिलालसा।
महास्तनी तन्त्रिहस्ता बङ्गाली कैरवप्रिया॥३॥

शुद्धाम्बरा शुद्धवपुस्सुवेषा
सुवेणिका तालघनस्तनी रतिः।
चतुर्भुजा चन्दनचर्चिताङ्गी
सा शुद्धसालाकवधूः प्रसन्ना॥४॥

काम्बोजा चन्द्रवदनी नीलोत्पलविभूषणा।
रमणीयस्तनाम्भोजा बाणपुष्पावतंसिनी॥५॥

मधुमाधविका रम्यमाधवीकुसुमप्रिया।
वसन्तवनमध्यस्था पीनोन्नतपयोधरा॥६॥

देवग्री दधिपाणिपात्रयुगला ग्रैवेयभूषोज्चला-
स्तब्धोरोजसरोजकामचपला नाकेऽपरासुन्दरी(?)।
कौसुम्भाम्बरधारिणी विधुमुखी श्रीखण्डचर्चस्तनी-
काश्मीरारुणविग्रहा सुनयना बिम्बोष्ठिका राजते॥७॥

देहली कनककान्तिसुन्दरा रत्नहारकुचकोरकाधरा।
वल्लकी करसरोरुहा शुभा कामिनी नटहरेर्विराजते॥८॥

इति श्रीरागरत्नाकरे गन्धर्वराजविरचिते
सपत्नीकनटनारायणध्यानम्॥

अथ एतेषां षड्रागस्त्रीणामनुक्रमेण षट्त्रिंशपुत्राः प्रदर्श्यन्ते ॥

शुद्धगौडोऽथ कर्णाटो[१] मालवो पूर्विक[२]स्तथा
केदारश्चैवसालङ्गः श्रीरागः स्त्रीसुताः क्रमात्॥१॥

---

१. मातृकायां 'कर्ना..' पाठः २. मातृकायां 'पु..' पाठः ।

सर्वालङ्कारसंयुक्तो गौरः शुक्लाम्बरप्रियः
सप्रवाहाः शङ्खपाणिः सगौडः शुद्धसंज्ञकः॥२॥

लोहिताम्बरधारी च श्वेतमाहिषवाहनः।
नारिकेलफलासक्तो युक्तः कर्णाटकः स्मृतः ॥३॥

रक्तनेत्रो महाकायो धनुर्बाणयुतः करः।
श्यामस्सुरङ्गवासोऽपि सोऽयं मालवगौडकः॥४॥

श्वेताम्बरो गजारूढो धनुर्विद्यातिकौशलः।
सुगोत्रो भिन्नवर्णः स्यात्सप्रोक्तो पूर्विकस्तथा॥५॥

कर्पूरगौरो मृगवाहनश्च
धनुःशरैर्मण्डितपाणिपद्मः।
प्रसन्नवक्त्रो शिवसन्निधे यः
केदारगौडः कथितस्ससर्गः॥६॥

मेषवाहस्तनुः श्यामः पीनवस्त्रो मुदा नमः।
असिहस्तो महाकायः सालङ्को गौडनामकः ॥७॥

इति श्रीरागस्य सस्त्रीणां पुत्राः॥

अथवा सन्तस्य पुत्राः

जेजावत्यो हर्षकश्च मल्हारो रविगुप्तकः।
सिन्धुरष्टकरागश्च वसन्तस्य सुताः क्रमात्॥१॥

आनन्दवक्त्रो वननीलवर्णो
विभूषितो यः शुभभूषणैश्च।
सुपीतवस्त्रो गजवाहनश्च
जेजावती यो गुणनामधेयः॥२॥

अतीव पीनोमृदुपाणिपादौ
पृथूदरो गौरवपुः सुनेत्रः।
हस्ते दधानो जपं मालिकाञ्च
सहर्षरागः कथितो मुनीन्द्रैः॥३॥

मल्लारिर्निर्मलस्साधुर्देवपूजनतत्परः।
पादुकाचरणो दण्डी शिखी यज्ञोपवीतवान् ॥४॥

गौरः श्यामो महातेजाः पीतवासोऽतिसुन्दरः।
अश्ववाहः पद्मकरः सरागो रविगुप्तकः ॥५॥

इभवक्त्रोङ्कुशकरो रक्तो रक्तविभूषणः।
सिन्दूरचर्चिताङ्गश्च स सिन्धूर[1] उदाहृतः ॥६॥

गौरः पीतो महाकायः महाप्रज्ञो महाबलः।
मुद्गरो राजते हस्ते सरागष्टङ्कनामकः ॥७॥

इति वसन्तस्यपुत्राः॥

हिंदोलो बडहंसश्च गान्धारो पावकस्तथा।
मनोहरो दीपकश्च षडेते पञ्चमस्सुताः ॥८॥

हिंदोलकः श्यामवर्णोऽश्ववाहो वनजप्रियः।
रक्तवासो कृताश्वासो करे पट्टदुकूलकः ॥९॥

बडहंसो बाललीलो लावण्यामृतसागरः।
वेणुहस्तोऽतिक्रीडश्च गम्भीरो बालनिस्वनः ॥१०॥

सदागीतो तथा धीमान् सहवीणोऽतिकौशलः
कोमलाङ्गो ह्रस्वकायः गान्धारः परिचक्षते।
अग्निवर्णो धूम्रशिखी तप्तदेहोऽतिसुन्दरः
शक्तिहस्तो मेषवाहः पावकः कथितो बुधैः॥११॥

मनोहरो मण्डितदेहयुक्तो
विलासिनीदर्शनलालसश्च।
पुष्पावतंसो सितवस्त्रवेलो
सुकुण्डलो मौसलधृक्प्रियावान्॥१२॥

दीपको दिव्यदेही स्याद्विल्वमूले कृतालयः।
बाणको दण्डधृक्क्षत्री काञ्चनाभः सिताम्बरः॥१२॥

॥ इति पञ्चमरागसुताः॥

शृंखलाभरणः प्रोक्तो ललितश्चन्द्रशेखरः ।
पञ्चवक्त्रश्च कह्लारो कामोदो भैरवात्मजः॥१॥

---

१. मातृकायां '..न्दू..' पाठः ।

त्रिशूलस्तोमरोहस्ते शुभ्रो वृषभवाहनः।
जातो हृदि भैरवश्च शृंखलाभरणस्मृतः॥२॥

अतिस्निग्धोऽतिगौरश्च दिव्यगन्धानुलेपनः।
मृगपाणिर्जटाधारी योगी ललितसंज्ञकः॥३॥

कर्पूराङ्गो भीमकायः विधुभालो निरीहकः।
त्रिलोचनो भस्मलेपः चन्द्रशेखरसंज्ञकः॥४॥

पञ्चाननो दशभुजो विरूपाक्षो वृषध्वजः।
घण्टाशूलधरो धीरः पञ्चवक्त्रः प्रकथ्यते॥५॥

कह्लारः कमलासनस्त्रिनयनो व्याघ्राम्बरो भीषणः
खट्वाङ्गी वृषवाहनो जलनतिः कूष्माण्डकान्तिर्युवा।
कर्णे नागसुकुण्डलो वररुचिः स्यान्नीलकण्ठो विभु-
र्गीती गानरतो विलासयुवतीकान्तः [१]स कामोदकः॥६॥

रमणीयवेषसुलभः क्रौञ्चप्रियो दीर्घपाद्
दण्डी विप्रनिभो विलोलनयनो विद्याधराणां प्रियः।
पञ्चास्यो विधुसंनिभो ललितवाग्भस्मप्रियो राजसो
वेदाभ्यासरतो महामतिधरो रागस्सदा पातु वः॥७॥

॥ इति भैरवसुतवर्णनम्॥

हंसश्च घटकण्ठश्च कमलो रोहकस्तथा।
विद्युन्मालो मोदकश्च मेघरागसुताः स्मृताः॥१॥

शुभ्रो दुग्धप्रियो धीरो हंसरूपस्सपक्षकः
सुकण्ठो कोमलो कामी हंसरागो विराजते॥२॥

नीरदाभश्चतुर्हस्तो धृतकुम्भसरोरुहः
कमनीयवपुः शान्तो घटकण्ठः प्रचक्षते॥३॥

कमलो कमलाहारो कमलासनसंस्थितः।
कमलद्वयधारी च कमलाङ्गद्युतिः पुमान् ॥४॥

---

१. मातृकायां पाठः 'स्वदतिमोदकः कामन्दो'। श्लोकस्य साधुता यथा स्यात्तथा पाठः प्रकल्पितः।

अश्ववाहः खड्गधरः पीतवस्त्रो प्रजागरः।
गौरो गगनगामी च रोहकस्स सुगीयते॥५॥

तटित्प्रभोऽतिदीर्घश्च चञ्चलो मांसकप्रियः।
वज्रहस्तोऽतिदीप्तश्च विद्युन्माल इतीष्यते॥६॥

मत्तोमत्तालि संसेव्यो मत्तवारणसंस्थितः।
वारुणीपात्रहस्तोऽपिमोदको राग इष्यते॥७॥

इति मेघरागपुत्रक्रमः॥

बङ्गालो नाटरागश्च गारुडो मोहनस्तथा।
रमणीयप्रमोदश्च नटनारायणस्य तु॥१॥

बाललीलातनुर्बालो सुवस्त्रेण सुशोभनः।
बलाका क्रीडनासक्तो बङ्गालो राग इष्यते॥२॥

अनेकनटधारी च युवागौरोऽतिशोभनः।
ताम्बूलहस्तो स्मेरास्यो नाटः सुरसिकैर्मतः॥३॥

गारुडो गरुडाकारो धृत सर्पो विलोलकः।
रक्तनेत्रः पीतवस्त्रः सर्वाभरणभूषितः॥४॥

सुन्दरो लोहिताङ्गश्च तरुणो रूपवांस्तथा।
स्त्रीजितो मदनाकारो मोहनस्सनिगद्यते॥५॥

कोमलाङ्गो नीलवस्त्रो पीतमाली सुरूपवान्।
सर्वरागेषु सुरसः रमणीयः प्रचक्षते॥६॥

सुखरूपो दिव्यदेहो लीलाकमलधारकः।
पूर्णेंदुवदनो रागः प्रमदो मदनातुरः॥७॥

इति श्रीरागरत्नाकरेगन्धर्वराजविरचिते
नटनारायणषट्पुत्राः॥

श्रीरागश्च वसन्तश्च सद्योजातात्प्रजायते।
ईशानाद्भैरवश्चैव तत्पुरुषास्तस्य पञ्चमाः॥१॥

अघोरान्मेघरागश्च वामदेवान्नटस्तथा।
एतानि रागजन्मानि यो जानाति स पण्डितः॥१॥

इति ईश्वरपञ्चमुखाद्रागजन्मानि॥

अथ षट्त्रिंशद्रागपुत्राणामनुक्रमेणाङ्गनाः॥ षड्त्रिंशद्वक्ष्ये उतसामाख्याः

नटा लङ्का च सुनटा तैलङ्गी हम्बिरी तथा।
लाङ्गुली दुःवैराटी कल्याणी च वसन्तिका॥१॥

तरङ्गिणी देशकरी नाथा रागगिरी तथा।
बहुली सैन्धवी चैव सोरटी मालिनी तथा॥२॥

नवरोजा च भूपाली नारी नारायणी तथा।
मारू कुरङ्गमाला च तुण्डी मङ्गलकौशिका॥३॥

वीचिवेला माहुली च डोती च मेघरजिका।
मृतसञ्जीविनीया च नागधन्वा तथापरां॥४॥

सुधामयी च त्रिवली षट्त्रिंशद्रागिणी स्मृताः।
क्रमशो रागपुत्राणां भार्या एताः स्मृताः प्रियाः॥५॥

इति श्रीरागपुत्राणां नामधेयानि॥
अथ स्वरूपज्ञानम्॥

गौराङ्गी सुन्दरी ह्रस्वा चतुरा मृदुभाषिणी
कुङ्कुमार्द्रौ करौ यस्याः नटा सा परिकीर्त्तिता।
श्यामापयोधरा दीर्घा तरुणी कोकिला ध्वनिः
ताम्बूलं भक्षयन्ती च सालङ्का कथिता बुधैः॥१॥

सुनटा लम्पटा नारी कर्बुराङ्गी रतिप्रिया
नृत्यन्ती च हसन्ती च लीलाकमलधारिणी।
स्निग्धाभ्यङ्गवती गौरी मणिदन्तविलासिनी
कुङ्कुमार्द्रा मुक्तकेशा तैलगी नृपवल्लभा॥२॥

हरिताङ्गी हरिद्वस्त्रा मणिकुण्डलभूषणा
पीनोरस्का गुच्छधारी हम्बिरी सुकरप्रिया।

कृष्णा रक्ताम्बरा स्थूला गुञ्जाहारविभूषणा
स्थूलोरोजा लोमशा च लाङ्गुली गृध्रजप्रिया॥३॥

दुर्मुखी हास्यरहिता कृशा ह्यचपलामला
अल्पस्तनी ग्लानमुखी दुःखवैशटिका स्मृता।
शुभवाक्चन्द्रवदना पुलकाङ्कितसुस्तनी
नीलोत्पलकराश्यामा कल्याणी मृगवाहिनी॥४॥

मधुमत्तमानिनी च माधवी कुसुमप्रिया
हरिचन्दनचर्चाङ्गी पृथूरोजा वसंतिका।
चञ्चला चत्वरा मध्या विचित्राम्बरभूषणा
उडुपस्था पृथुकुचा सा च प्रोक्ता तरङ्गिणी॥५॥

देशिकारा नागरिका नरमोहनतत्परा
सुन्दरी अश्वपृष्ठस्था धृतताम्बूलपट्टिका।
राजस्त्रीवद्द्योतयन्ती दिव्यपुष्पावतंसिनी
सुमध्या सुष्ठुवचना नाथा प्रोक्ता मनीषिभिः॥६॥

यक्षिणी पद्मवदना यक्षकिन्नरदुर्लभा।
वीणाहस्ता पर्वतस्था प्रोक्ता रामगिरी बुधैः।
धवला किङ्किणीरावा स्वर्णकुम्भपयोधरा
सुनाभिः कुजनयना बहुली धेनुका प्रिया॥७॥

लीलावती लोकरम्या सुहिनाम्ना च राजिता
शङ्खवाद्यप्रिया लोला चुबुकोद्देशशोभिता।
कमनीया चापहस्ता कदलीवृक्षमण्डिता
सुरोजा च वरारोहा सैन्धवी वासुकी प्रिया॥८॥

नितम्बिनी गूढगुल्मा वर्त्तुला च वधूप्रिया
चूतप्रिया लवसती सोरटी किन्नरध्वनिः।
बहुपुष्पवती रम्या वनमालाविभूषणा
हस्तस्तबकसंयुक्ता मालिनी सा प्रकीर्त्तिता॥९॥

नवोरोजा महारम्या नवकाञ्चनभूषणा
ताम्बूलपूर्णवदना दिव्याम्रस्तनमण्डिता।
भूपालीशुद्धसत्त्वाढ्या क्षीरोदवसनानघा
प्रातःकाले सदासेव्या रागज्ञानविशारदैः॥१०॥

नराणां मोहनी नारववल्लभवल्लभा
किन्नरी वाद्यनिरता नित्यं नगरवासिनी।
तुलसी मञ्जरी माला मेघश्यामा कुरङ्गदृक्
शङ्खचक्रगदाम्भोजपाणिर्नारायणी स्मृता॥११॥

मारुः श्रीमत्प्रिया दीना कृपालुश्च कृशोदरी
विवेकनिरता शान्तासभया करुणानता।
कुरङ्गमालिनी ध्याता यदिगीता कुरङ्गमे
कुरङ्गान्मोहयत्पाशुमदनाकुलमानसा॥१२॥

तुण्डिसप्रमनोरम्यानाम्ना कस्तूरिका प्रिया
कोमलाङ्गी सुनेत्रा च अलाबुस्तनमण्डिता।
सर्वमङ्गलसौभाग्या मधुरध्वनिरुत्तमा
कर्पूरामोदनिःश्वासा सर्वावयवसुन्दरी॥१३॥

चपलाङ्गी सुनयना नीलोत्पलतनुःकृशा
रागिणीवीचिका ज्ञेया पद्मकुड्मलकस्तनी।
वेला दीर्घध्वनीकाम्या मुक्ताहारविभूषणा
सुकटा मेखला युक्ता विशालहृदयानघा॥१४॥

माहुलीशङ्खहस्ता च नखकेशसुशोभना
दाडिमोष्ठी ह्रस्वकुचा कम्बुकण्ठी सुशोभना।
डोम्बीकाया महादीर्घा लोलनेत्रा घटस्तनी
काकस्वरा खराक्रान्ता मद्यपानपरायणा॥१५॥

सुनाभिः शुभवक्त्रा स्यान्मेघध्वनितटित्प्रभा
स्मेरास्या काममेषाढ्या शुभपल्लवमण्डिता।
अमृतानन्दसन्तुष्टा मृतसञ्जीविनी मता
चतुर्भुजा वृत्तकुचा देवानां प्रीतिवर्धनी॥१६॥

अधोवेधरणी प्रोक्ता स्थिरा कुम्भकरावरा
पृथूरोजा गुहानाभिः वरारोहा विशालदृक्॥
सुधामयी सुधारा च सुधापानवती शुभा
सुधा कलशहस्ता च रागिण्यमृतवर्षिणी॥१७॥

त्रिवली त्रिमुखी प्रोक्ता त्रिस्वरा त्रिपदी त्रिधा
त्रिनेत्रा त्रिस्तनी श्यामा त्रिवर्णप्रेमवर्धनी।

रणरक्तपाः स्मृता एताः ज्ञातव्या रागकोविदैः
एतास्संज्ञानमात्रेण गन्धर्वसदृशोभवेत्॥१८॥

इति श्रीरागरत्नाकरे गन्धर्वराजविरचिते-
रागस्नुषावर्णनम्॥

अथोपरागाः कथ्यन्ते॥

श्रीगिरिः कामपीठश्च चेलपिञ्जारकस्तथा।
तमालपाण्डरागश्च फेनलः करवीरजः॥१॥

पारदःपारवीरश्च काफी चैनदुसैनिकः।
पाराशो रिन्दुकः कङ्को बिल्वकः कोणस्तथा॥२॥

सिंधुजो मयरागश्च पार्वतीयो धराधराः।
गङ्गासागररागश्च नवरागस्तथैव च॥३॥

कीटकः शृंखला बन्धोराजधानीद्विजे ततः।
धुरकः कमठो योगी हंसो मारीचकस्तथा॥४॥

कैवर्त्तो धीरधन्वा च कारुः किंकण इत्यपि।
इत्येते उपरागाश्चकथिताः शङ्करेण वै॥५॥

यस्सदाभिः स्वरैर्गायन् रागज्ञानविचक्षणः।
सर्वान् कामानवाप्येह शिवेन सह संवसेत्॥६॥

षड्भिः स्वरैश्च योगायेत् स रागः षड्जवत्स्मृतः।
यःस्वरैः पञ्चभिर्गायन् पाण्डवः परिकीर्त्तितः॥७॥

रागसाधारणङ्गायन् व्याकल्पान्तरितस्वरैः।
जात्यादिभिः स्वरालापैः शुद्धरागः प्रकीर्त्तितः॥८॥

श्रुतिसिद्धा स्थानशुद्धा जातिशुद्धा स्त्रिधा मताः।
ग्रहसंन्याससंयुक्ताश्चान्यथा कीर्त्तिता बुधैः॥९॥

ग्रहसंन्याससंन्यासी ससन्यासकप्रियम्।
यो विजानाति रागज्ञो गान्धर्वज्ञो विचक्षणः॥१०॥

स्वराणामपि सप्तानां क्रमाच्चत्वार एव हि।
स्वादुसंवारणश्चैव तथारोहावरोहणे॥११॥

मध्यमग्रामसम्भूता मध्यमात्राग्रहान्विता।
मध्यमा गीतकस्यैताः श्रीरागे विनियुज्यते॥१२॥

सापामासमापापानपामामागरिसासनः।
धासासा इति सोपाग्रामसंज्ञमसंज्ञकाः॥१३॥

भिन्नषड्जसमुद्भूतो संन्यासोऽथग्रहांशिकः।
तवशेषग्रहाः प्रोक्ताः प्रवसङ्ख्येव भैरवः॥१४॥

धापागमामधानासमिधागामाधमीसगाः।
सन्निधागाधनीनाश्च षड्जग्रामः क्रमात्स्वराः॥१५॥

भैरवः शुद्धपञ्चरक्तकौशिको ललितो मतः।
ग्रहसन्यासषड्जा सा गोत्रा वीरवियोजिताः॥१६॥

व्रअभव्रभषासा ग्रहन्यासा स धैवताः।
वेलावली भोगदारा विप्रलम्भे न उच्यते॥१७॥

षड्जग्रामभवा धासाषड्जन्यासग्रहान्विता।
सतारधैवतसोमं द्रोमध्यमान्यासमस्वराः॥१८॥

षड्जग्राहश्च संन्यासी गान्धारस्वरवर्जितः।
ऋषभो मुनिमाघेन षड्जभादिविवर्जितः॥१९॥

आन्दोलितनवस्थाने मध्यमादिविलम्बितः।
मध्यमः पञ्चमश्चैवनित्यम्भवतिकम्पितः॥२०॥

शृङ्गारेषु जनाहर्षोदृश्यते गीयते बुधैः।
आलापो जीवितं प्रोक्तं शरीरन्तस्य जन्मभूः॥२१॥

उभयोस्सङ्गमो यत्रतदेवोत्तमयापनं।
कालस्वरञ्चक्रमुखं निरोष्ठं सानुनासिकम्॥२२॥

अप्रबन्धं वितालश्च कनिष्ठङ्गायनं स्मृतम्।
अलघुस्वरसंयुक्तं सुकण्ठध्वनिमिश्रितं॥२३॥

असमाप्ते समालापे पदमुद्ग्राहयन्ति ते।
आबोधाद्यर्णभिन्नाये राजानं मध्यमं स्मृतम्॥२४॥

शुद्धसालङ्क संपूर्णभैदैर्गीतं त्रिधा मतम्।
निबन्ध्य मणिबन्धन्तं द्वितन्तुर्द्विविधं स्मृतम्॥२५॥

आलाप्तिर्निबद्धास्यां निबन्धं तालसंयुतम्।
आलापा द्विविधा प्रोक्ता साक्षराश्च निरक्षराः॥२६॥

[१]स्फुटितः कम्पितो लीनो सत्रिपादौलितौ तथा।
आहृतश्चित्रभिन्नश्च सप्तैते गमका स्मृताः॥२७॥

गौडीश्च मधुरा शुद्धसाधारणी तथा आलप्तिः।
पञ्चधा ज्ञेया गीतरागाश्च सूचकाः॥२८॥

रसिको भावकश्चैव अमुकारोधरञ्जकः।
चत्वारः कथिताह्येते तिष्ठद्धारश्च पञ्चमः॥२९॥

यथा पुरुषनारीणां लक्षणाभरणञ्चयत्।
तथा गीतं मुनिश्रेष्ठा ज्ञानव्यं तु प्रयत्नतः॥३०॥

उद्ग्राहे नगराश्चैव अन्तिरो शिथिलास्तथा।
अभङ्गे हटकश्चैव नववर्णा विवर्जयेत्॥३१॥

नकारे नष्टसर्वस्वो घकारेघात एव च।
हकारे हरते लक्ष्मीः त्रयो गीतस्य वैरिणः॥३२॥

धातु धातुस्वरास्तालगपागर्वषडुच्यते।
एतान्यङ्गानि षट् चैव ज्ञातव्यानि च सङ्गिते[२]॥३३॥

स्वरसारस्मृतिः कर्णोद्विविधा लतिलोचने।
रागक्रियाङ्गभागाङ्गशरीरं प्रोच्यते बुधैः॥३४॥

पदेपरक्त विज्ञेयो हस्तौ रोहावरोहणे।
निबद्धं चानिबद्धत्वं घ्राणं च वदनं स्मृतम्॥३५॥

वयवस्तानवर्णानां त्रिस्थानं त्रिगुणोच्यते।
यो जानाति पुमान् श्लोको ज्ञायते गीतकोविदैः॥३६॥

नादध्वनिश्च माधुर्यभावभेदरसामृतम्।
सञ्जीयोजीयनं ज्ञेयङ्गायकाः कवयस्सुधीः॥३७॥

---

१. श्लोकोऽयं कुत्रचिदेवं पठ्यते, तद्यथा सङ्गीतदामोदरे–

कम्पितः स्फुरितो लीनो भिन्नः स्थविर एव च।
आहतान्दोलितौ चेति गमकाः सप्त कीर्तिताः॥ इति।

२. 'सङ्गीते' एव शुद्धम्। तथात्वे छन्दोभङ्गः।

धातुहीनं पादभङ्गं कुशब्दङ्गुणनिर्वृतम्।
द्विकर्णमिश्ररागञ्च अप्रवृद्धनुमातृभिः॥३८॥

कुम्बतालस्थूलबाधा आपुर्धामीपुनर्गता।
चिरं संविकलं भिन्नं गीतदोषाश्चतुर्दश॥३९॥

अधमो धातुकारश्च मातुकारश्च मध्यमः।
धातुमातुसमायुक्ताः उत्तमाः परिकीर्त्तिताः॥४०॥

मगणो यगणश्चैव रगणस्सगणस्तथा।
तगणो जगणाश्चैव भगणो सगणोऽष्टमः॥४१॥

सविसर्गो सव्यञ्जनो दीर्घयुक्तपरो गुरुः।
एतस्य वैपरीत्येन लघुर्ज्ञेयो विचक्षणैः॥४२॥

सानुस्वारविसर्गो यो दीर्घो युक्तपरश्च यः।
वामत्सोयत्सतद्वक्त्रो ज्ञेयो ज्ञो मृतजो लृजः(?)॥४३॥

यो भूमिं रक्तगुरुश्रियं द्विशति यो वृद्धिं जलञ्चानिलो।
योग्निर्मध्यलघुर्विना शमनिलो देशाटनं सोगतः॥
ते व्योमान्तलघुर्धनापहरणं लोकेरिजं मध्यमो।
भश्चन्द्रो यशसोञ्ज्वलं मखगुरुश्शम्भुः स युस्त्रिलः॥४४॥

सोमो भौमो बुधो जीवो शुक्रो सौरि।
रविस्तथाक्रमादकचटतानां पयसानांग्रहास्मृताः॥४५॥

अपसना गौरं वर्णा कृष्णकवटया स्मृताः।
मिश्रिताभ्यामवर्णाचरक्तः सानुस्वरास्तथा॥४६॥

इति रागरत्नाकरे गन्धर्वराजविरचिते
अष्टवर्गगीतलक्षणम्

गणपञ्चरणाम्बुजां नरम्भाउपदवरगेहकं स्मरम्।
शारदाम्भोजपदानि नजमिदमानरमानसेस्मर॥१॥

तच्छब्दे कथितं विश्वं ब्रह्मतन्नभवेत्तथा।
तस्मात्तन्नाविशब्दोऽयं कथ्यते गीतकोविदैः॥२॥

अकारो वासुदेवस्य तस्मादादौ विचिंतयेत्।
एकारः शक्तिरेवस्याद्गायनादौ प्रकीर्त्तिताः॥३॥

रामे घनचरप्रोक्तानस्मिन्ज्ञाते शुभम्भवेत्।
ईकारस्सर्ववर्णानांमान्तालक्ष्मीप्रकीर्त्तिता॥४॥

इति स्मृत्वा स्मरेद्गायन् शुभं भवति नान्यथा।
इति वैमात्कासोयमनुलोमविलोमता॥५॥

ईशवाक्यप्रयत्नेन योजानाति सगायकः।
रागरत्नाकरज्ञानं यो न जानाति मूढधीः॥६॥

तस्मात्सर्वप्रयत्नेन रागज्ञानं समाचरेत्।
एकान्ते विजनेदेशे नद्योद्योगर्जिते सति॥७॥

तच्स्थाने तु सुशिक्षेत रागमार्गं विचक्षणः।
ह्रदे वा देव खाते वा गुरुदर्शितमार्गतः॥८॥

कण्ठप्रमाणमुदकं स्थित्वा रागमवाप्नुयात्।
ब्राह्मीमुण्डीवचाशुण्ठीपिप्पलीमधुसंयुता॥९॥

सप्तरात्रप्रयोगेण किंनरैस्सहगीयते।
अहकभहकपिछरसं लचबालचमुण्डीसध्वरसं॥१०॥

नरवान्दसि कोकिलनादरसं स्वरं।
पिबत्कृणचतुर्दशमाद्यदिनम्॥११॥

शिवाम्बु त्रिफलायुक्तं पिबेन्मण्डलसप्तकम्।
दिव्यदेही भवेन्मर्त्यो दिव्यस्वरमवाप्नुयात्॥१२॥

इत्येवरागवनं शिवेन परिकीर्त्तितम्।
भक्ताय यक्षराजाय गन्धर्वाय च धीमते॥१३॥

क्षीरोदमथनोद्भूतै रसरोगणकैस्तथा।
अभ्यसेत्तं प्रयत्नेन तनोभुविसमागतम्॥१४॥

---

१. 'यश उज्वलं' इति मातृकापाठः।

सुखीजनसुखङ्करी दुःखिनो दुःखहारी।
श्रवणजनविनोदौ कामिनी चित्तभेदी॥१५॥

रतिरभसविधातामन्मथस्याग्रहस्तो।
जयतिजयतिनादः पञ्चमश्चोपदेशः॥१६॥

न कैलासे न वैकुण्ठे वसतः शिवमाधवौ।
यत्र गायन्ति ये भक्तास्तिष्ठतस्तत्रसंनिधौ॥१७॥

रागज्ञानं हरौ भक्तिस्सुपुण्येन च लभ्यते।
गुरोः कृपापयः पीत्वा सर्वसिद्धिमवाप्नुयात्॥९॥

॥ इति श्रीगन्धर्वराजविरचितरागरत्नाकरस्समाप्तः॥

॥ श्रीः ॥